के मर्कटीविषनाशनं ६० निर्गुंडीतुलसीवाहमारपत्राणि वारिणा पिष्टानि लेपनो [illegible]तिच्छर्दिहंन्मर्कटीविषम् ६१ समाहं

मर्कटीमूलपत्रनालानि वारिणा । यः पिबेत्तस्य नश्यंति मर्कटीविषजा रुजः ६२ इति मर्कटीप्रतिक्रिया वज्रीक्षीरेण संमिश्रं क
णचूर्णं त्रिसप्तकं भक्षितं नाशयेत्प्लीहं मधुरान्नाशिनो चिरात् ६३ यस्ताभिधानमश्वाख्ये दारयित्वेंद्रवारुणं मूलमादिप्य
तेहूरं तस्य प्लीहा विनश्यति ६४ चिरस्थवाणगुंजाया मूलिका दंतचर्विता गिलिता नाशयेत्प्लीहं यवाम्लभोजने ध्रुवं ६५
लवणं काकर्कपत्राणि वह्निनांतरधूमतः दग्धानि मधुलीढानि प्लीहहन्नृपतिदारुणं ६६ गुडेन केतकीक्षारो भक्षितः कदली
फले चित्रमूलानि तेनाथ प्लीहहृद्धेति दिनत्रयम् ६७ एरंडतालमूलानि दग्धान्यंतरधूमतः जलेन गोजलेनापि प्लीहसंप्र
तिपानतः ६८ भल्लातकाभयाजाजीगुडेन कृतमोदकः सप्तरात्रान्निहंत्याशु प्लीहानमतिदारुणं ६९ हरत्युनर्नवामूलं तंडु
लांबुयुतं त्र्यहं पीत्वा नरः कदाचित्प्लीहानं नैव पश्यति ७० पामाविवर्चिकाकंडूशुक्लमंडलिकामपि नाशयत्येव समाहाल्ल
तो मर्कटिकामपि ७१ प्लीहोदरशतीकारः चेथ्याककोटिकामूले रवौ पीते दिनाष्टकं प्रीतेन वारिणा दिने नालगुल्मं प्रशा
म्यति ६९ एरंडफलशुष्काणां पक्वानामथ मार्षिषा मदाणत्रालगुल्मस्य प्रशमो जायते ध्रुवम् ७० भल्लातकस्य प्रदानेन किंवा
प्रीतस्य वारिणः धारापाताच्छ्रमं याति नालगुल्ममसंशयं ७१ पाठामूलेथवक्रांकामूले वा तंडुलांभसा पीते पीडाशमं या
ति जठरस्यातिदुःसहा ७२ तरुणीकदलीपत्रं भस्मगालितवारिणा क्षिप्तं भक्षेत्सद्यः श्वयथुपीडा मंदरसंभवा ७३ समयाहिम
वन्मेत्रप्रजमेवारि पाययेत् हंतेम्प्लेशमं याति तदनघ्रोपादरोद्भवं ७४ हिमालयोत्तरे पार्श्वे ग्रावकर्णो महाद्रुमः तत्रसूत्लेसम्

ऊँ
५५
59

सन्वंतत्रैवविलयंगतं ७५ गुडेनसर्षिषापक्वकदलीकंदभक्षणात् जंतजालेपतमाशुजठरोद्भूतमङ्गते ७६ वीजेपालाश

जेनिंबेविडंगेगोमधुनासह पक्वैकंभक्षितंजंतून्पातयत्युदरोद्भूतान् ७७ उदररोगप्रतीकारः निंबपत्रामलानांयवक्षूर्णंभक्षि

येन्वहं निशांतेनस्युदेहेसेपिजायतेसौपुनर्नवः ७८ करंजसर्षिषासिंधुसोमराजीशिवानिषण्ण विडंगेगोजलैर्लेपोहंतिकुष्ठम

दारुणं ७९ एकभागेस्तिलैर्मिश्रासोमराजीद्विभागिका भक्षिताहंतिडवोरांपामांदद्रुंमसंशयं ८० द्वेहरिद्रेवचकोकाववा

भल्लातकेगुडः गोमूत्रपिष्टलेपोघेमकेंदीदद्रुनाशनः ८१ विशुष्कगोमयेनादौनिघृष्टंत्वसरंव्रजेत् अपस्मृतकगोमूत्र

लवणक्षाथलेपिते ८२ गजवल्कलगंजानांचूर्णंस्वलणसंयुतं सतक्रताम्बकल्केनलिप्तंकुष्ठंप्रणश्यति ८३ कनकस्य

कमर्दस्यपंचांगीगोजलेस्थितः समाहलेपितानाभ्यांचूर्णाद्दद्रुर्विनश्यति ८४ हरिद्रातालगोमूत्रदूर्वासैंधवलेपतः चिर

कालभवादद्रुःत्वसरेवाविनश्यति ८५ वाकुचीवीजसंमिश्रमेषीडुयोल्पत्तनिका मधुलीढास्थितंकुष्ठंहंतितत्कालनपानतः ८६

गजचित्रकचर्मोत्थमष्यपःपंकलेपनात् स्वर्णवर्णंभवत्यंगंश्वेतकुष्ठेनदूषितं ८७ गिरिकर्णीशिफापिष्टावारिणालेपः

मात्रतः पक्षमासेथवाहंतिश्वेतकुष्ठेनसंशयः ८८ निंबुकीफलनिर्यासनिघृष्टंमरिचान्वितं त्वरशृंगतरोर्मूलंहंतिकं

डूंप्रलेपतः ८९ परतस्तालसिंदूरस्रोतोजनसमान्वितं हंतिपामांप्रलेपेनकटुतैलेनपाचितं ९० महिष्यानवनीतं

नसिंदूरंमरिचैर्युतं पामांहंतिप्रलेपेनकटुतैलेनपाचितं ९० महिष्यानवनीतेनश्रीवध्यानमिवाशुभम् ९१ सिंदूरपिष्ट

३

क्षीरघृतं तैलमपाचितं विसर्पितिप्रलेपेन रक्तवातसमुद्भवं मञ्जिष्ठापटोलानां क्वाथः सर्वविसर्पनुत् शिरीषोशी
रनामाङ्कहिद्राणांवाविलेपनं ५३ पामाप्रतीकारः कूष्माण्डीबिल्वजन्दारोगोमूत्रेणसमन्वितः मरेभापामार्गभूति
र्वासनैलासितोपंसिनी ५४ मूलकस्यसबीजानिप्रियंगुश्वेदनेरसे कुष्ठेकूष्माण्डमेतानिसिध्यानश्यंतिलेपनः
ग्रपामार्गरसापिष्टमूलबीजानिलेपतः रंभाक्षारान्विताहंतिनिशावासिध्मसेवयेत् ५६ जंबामूलेसकापासीवीः
जमूलेदलान्वितं भौमेनकेणतलेपः सिध्मव्याधिविनाशनः ५७ सिध्माप्रतीकारः जलपिष्टामलालिमामहिष्यामद्ग
वह्निना पक्वानिशाकरोगंगेप्रलेपात्स्वर्णसेत्रिभे ५८ तिलकुष्ठसमसिद्धार्थनिशाद्वयविलेपतः स्नातियःसमवेदिव
गैयोवर्णोजलोनरः ५९ लोध्रार्ज्जुनसप्तनानांचूर्णंजेम्बफलोद्भवे समांशोद्धर्मेनेग्रीष्मेदेहदुर्गंधनाशने ६० इति
उर्द्धंतेनप्रकारः वासवस्यरजोयाहिशर्करामधुमिश्रितः कामलेरक्तपित्तेचपीतोहंतिदिनत्रये १ वासवोमधुः
नासिश्रोमाहितोरक्तपित्तहृत् मधुयष्टिसितायुक्तः पांडुरोगविनाशकृत् २ हस्साभोवातपांडुःस्याजडपरवसंग
नः पित्तपांडुश्वतद्रोगीपीतमूत्रादिविड्छविः ३ श्वेताभेकफपांडुस्तेतद्विकारान्नविपिव विज्ञेयःसर्वमतस्यपांडु
रोगस्त्रिदोषजः ४ रक्तत्वयान्वितःक्षीणःछर्दिशोषान्वितद्रुमः पीतभावसमालोकोपांडुरोगीस्मजस्तने ५ फल
त्रिकामृतावासातिक्ताभूनिंबनिंबजः क्वाथोमधुयुतोहंतिपांडुरोगंसकामलं ६ प्रतिपक्वानिविभायाः फलानि

ॐ.
६०
60

मृद्वह्निना दग्धास्विन्नानिश्वकानिश्वेतपित्तं हरेत्तिवे ७ वृषपत्राणिनिःपीड्यरसः समधुशर्करा पीतोयेनशमंयातिरक्तपित्तंसु
दारुणं ८ पांडुफामलारक्तपित्तश्वेतपित्तप्रतीकारः मरीचगुडमिश्रेणदधिपानेनशाम्यति पीनसोवलालोधूमदीप्तिप्रभोज
नतोयथा ९ शय्याहृद्धोजलेपीतेनिशाकालेयः पिवेत् तस्यपीनसजेदुःखेशमंयातिदिनत्रये १० इतिपीनसप्रतीका
रः शुक्तलीढंकणासिंधुकलिहृद्दफलंहरेत् स्वरभेदंशिवाचूर्णंपीतेवादुग्धसंयुते ११ स्वरभेदप्रतीकारः गोधूमचूर्णं
हेताकपत्रचूर्णंसमंमद्वा पोलिकासर्पिषाभक्ताकासश्वासनिवारिणी १२ स्वरभेदप्रतीकारः गोधूमचूर्णंहेताकपत्रचू
र्णंसमंमद्वा पोलिकासर्पिषाभक्ताकासश्वासनिवा॥ कोलिपत्रंशिलाजातीगंधकर्परसंयुते द्विगुणानिवलाचैषांधूमः
कासविनाशनः १३ पुरेजातीजटापत्रंशिलापामार्गजंफलं कोलिपत्रंचवधूधूमःकासंकोल्पश्रिनाहरेत् १४ त्रिफलापिप्पली
चूर्णंमधुनालीढ्वमाशुतत् श्लेष्मज्वरमहाश्वासशोषपीनसनाशनं १५ स्वरसंशृंगवेरस्यमाक्षिकेणसमन्विते पाययेत्श्वा
सकासघ्नंप्रतिश्यायकफापहं १६ कासप्रतीकारः पिप्पलीशिखिपिक्तानांभतिर्मधुसमन्विता वातहिक्कामहाश्वासंहंति
लीढ्वादिनत्रयम् १७ विभीतफलजंचूर्णंमधुनाकर्षमात्रकं भोजनानंतरंलीढंहंतिश्वासंनयोऽथ्रसी १८ सर्पिषामधुना
हस्तिवलामूलंदद्यंनयेत् अजादुग्धेनवापीतमेणमासस्त्वजोवियात् नीलीमूलंहृतकाथ्यंसर्पिषापयसासह रोगराजं
हरत्याशुनिपीतमतिदारुणं २० अश्वगंधाशिफाचूर्णंस्वदंष्ट्राफलजंमधु दुग्धपीतंवलंकुर्यात्हतरोगस्यदेहिनः २१ शो

षेशमयतेविस्सूक्तांनाशैलोजनान्विता दुग्धेनवासमंपीताकाकजंघानिहंतिते २२ अश्वगंधारजःपीतेमांसेदुग्धेनदोषि-
के चूर्णंवापीननोकुर्यादुग्धाहारस्यदेहिनः २३ अश्वगंधातिलानागवलामाषागुडोद्भवाः वलंकुर्वंत्यलंभक्ष्यामतवा
रणधारणे २४ पीनत्वकरणम् त्रिफलालोहचूर्णेनमधुनाशूलहारिणी लशुनंशंखकजःक्षारःपीतोम्लजलेन
वा २५ निरुद्धधूममनिर्दग्धंपीतेगोसर्पिषासह यत्नांगदुत्तेदेहेतिशूलेहत्स्पृष्टसंभवम् २६ शांखचूर्णंसलवणंहिंगुवोषस
मन्विते उष्णोदकेननस्तीतेहेतिशूलेत्रिदोषजे २७ नीलल्लायचूर्णंसंयुक्तेत्रिफलाचूर्णंगमनमे प्रयोज्यंमधुसर्पिर्भ्यांसर्व
शूलनिवारणे श्रिकीय्लुशपीसकेषानाला शूलप्रतीकारः सितासजीरसःसर्पिर्लीढातीसारनाशने याद्रीमरिव
विल्वंवासूदनीसहभाक्षितम् २८ वटप्ररोहसंभूतैरंकुरैस्तंदुलांभसा पिष्टैस्तक्रान्वितैःपीतैरतीसारोविनश्यति ३० व
बूलकोमलैःपत्रैर्वातिपिष्टैर्दिनत्रये पीतैर्नश्यतीतंसारोमहिषवद्धवाविरात् ३१ पारिभद्रंशिवासार्पिःकिंवादाडिमा
कृत्स्नलाः ग्रतीमारहवाःपीत्वाम्लकपिष्टाःसजीरकाः ३२ वबूलस्यकषायोवागोपयोयुतसेवितः त्रिदिनेपाननोहेतिर
सामातीसारमुल्वणं ३३ निर्दग्धधूममनिर्दग्धेवरमामकीफलम् पिष्टंगोसर्पिषापीतमतीसारनिवारणे ३४ कुरुस्व
यत्तरनियोसयावकाभ्यांसमर्दितम् निशाचूर्णंगुदेदत्तिभंवहिर्व्रणविनाशकृत् ३५ शातपत्रसशीरंववर्चरीकस्य
ध्वरी पत्रवतत्वयेप्साद्रव्णपप्रदापयेत् ३६ मेघनादस्यमूलानिमधुनासितयासह हरंतिशोणितस्रावेतेदु

ॐ
८१

61

लोदकपानतः ३८ मज्जमेव निशहूग्नातिविसंवतिमहर्ष्मज्जः ग्रहणीसेतिविज्ञेया वातपित्तादिदोषजा ३८ अंकोल्लमूलकर्ष
ई पिष्टं तंडुलवारिणा निपीतं ग्रहणीं हन्ति सर्वातीसारमेव च ३९ विश्वामतिविषां मुस्तं कुटजत्वक् ह्रिष्टहितः गुडतक्रयुते पी
ते ग्रहणीव्याधिनाशने ४० रक्तोत्पलस्य पत्राणि तक्रपिष्टानि पल्लवाः वासवस्याभसा पीता रक्तातीसारनाशनः ४१ महि
ष्या दधिसारेण भक्षयाल्लस्य मूलिका ग्रहणीं हन्ति वेगेन पथ्याहारस्य देहिनः ४२ अतीसारग्रहणीप्रतीकारः अपामार्ग
स्य बीजानि मधुसारोपराजिता ४३ निशाकङ्कयंत्रेति विसूचीलोचनांजनात् इति विसूचीप्रतीकारः त्रिफलायाभवे चूर्णेन नि
शया मधुना सह पीतं प्रमेहसंदोहं हन्ति यत्प्राशितो ध्रुवम् त्रिफलायाभवे चूर्णे गुडूचीमधुना सिता शिलाजितरसैकैकं प्रमेहं हे
तिलेहनात् ४४ मूत्ररोगप्रतीकारः मरास्य वर्चेला मिश्राकिंवा मधुपयोन्विता विक्षतास्तिलनालानां पीता शमव्याधिना
शिनी ४६ कर्कोटीमूलिकापीता दशाहात्पयसा सह भित्वाड शर्करा शीघ्रं पातयत्येव खंडशः ४७ वेणुत्वग्वरुणः का
थः शर्कराश्मनिपातनः मधुमिश्रसितेरंडतैलेवाहं तियानतः गोक्षुसमभृतं मूलेमालत्याः सासितं पशोः उत्पयपकं हरे
सीतं मूत्ररोधं सशर्करं ४९ अश्मरीप्रतीकारः यत्नोमालाधरोनाम जगामाश्रमसत्तमे मुनेर्देवामस्ततत्रतं दृष्ट्वान
नतोभवत् कुपितोस्य दरोशापं ख्यातेम्भविभवेत्यसौ शूलकं व्याधिनायुक्तो विह्वापीडः खितोनिशं ५२ अनवक्रक
पोलालोमेव यासिव तिष्ठसि लेवकर्णे निमीत्रेणव्याधिनापीडितोम्रशो ५३ वातः शूलेशिरः कंपोलालास्रावो

तिमृद्धता हिक्काछर्दिःकृशांगानंदहेतेनेतिलहाणं ५४ पिप्पलीमरिचंशुंठीलशुनैसैंधवैर्वचा गवाक्षीरेणपिष्टा
नोपानमालेपनेहिते ५५ अपामार्गरसेवापित्रणंसोपरिपीडयेत् लालास्रवन्तयोर्दंशाद्विषदोषोविनश्यति ५६
दाडिमीसतिलाहूर्वागुडेगुग्गुलुनान्वितः विषंनिहंतिलेपेनकपिलस्यातिडंःसहे मातुलुंगस्यपत्राणिलशुनेव
शुनार्दिते प्रवेशेवेयनेशीघ्रंतनोभवतिनिर्विषः ५७ गवाक्षीरंगुडाज्याभ्यामन्त्यतरसमंयुते अलर्कस्यविषंहंतिविष
मेलेपनोविरात ५९ चित्रकस्यरसःसर्पिमधुनासहलेपितः सर्वेषांनाशयत्येवगरलानिमहान्त्यपि ६० ॐनमोनरः
सिंहायविलवैवामनायत्रुटिसहपायकस्मायवासुदेवायनमोनमः अनेनमंत्रेणदर्भैरपामार्जयेत् विषंनाशयति ॐ
शुनकमेवशृहाणमेव२ स्वाहा अनेनमंत्रेणअर्कगुटिकायांजलमभिमंत्र्यस्नापयेत्निर्विषोभवति अलर्कविषप्रती
कारः ईषदग्निमतस्याभिः कर्परीभिःप्रगेरवौ स्वेदितोभानुसंख्याभिर्वलः द्विप्रविलीयते ६२ दर्वीमूलेननस्येनचटा
मूगस्यलेपतः रसांजनविशालावलेपाद्रोगोविनश्यति ६३ गुदद्रयेनचूर्णेनत्रिफलायाःप्रलेपतः वह्नातरकपा
लस्यप्रलेपोलिंगदोषहृत ६४ सुगंधिमल्लिकापत्रेमधुयष्टिसमन्विते भूकदंभस्यतैलेनघ्नकमेत्यलेपतः लिंगरो
गःशमयातियद्वादाडिमपल्लवैः भृष्टचूर्णंकृतैर्लेपान्नरोगःप्रशाम्यति लिंगरोगप्रतीकारः एरंडतैलसंयुक्तविशा
लामूलचूर्णके उरंडंगोपयःपीतेहंतिहितरदिनत्रये ६५ त्रिफलाचूर्णकंप्रातःपीतेगोमूत्रसंयुते कफवाताउद्भवंह

डॊ॰
६२
62

तिष्वपर्युहषणोद्भवं ६८ ईश्वरीमूललेपेन विल्लडीवमर्मवेपनात् कुरेंगेनाशमायातिवसन्तेनयथाबलः ६९ उत्पल
स्पशिफापीतागोमूत्रेण कुरंडत्वत् रक्तःशूकस्यवाविष्टालोपोपेन कुरंडहृत् ७० कुरंडः कोमलोदलो वामकर्णोर्द्धवे
धतः वामावादलकर्णोर्हे विद्धेनोभौप्रशाम्यति ७१ कुरंडप्रतीकारः सूरणोमशालीतक्रे कुरजस्यवाघृते न्ह
र्षाग्निहेतिपानेनसदावाविल्वभक्षणं ७२ जालिनीफलचूर्णस्य वर्त्तिर्वागुडसैंधवैः वृन्तीडरोपनसेभिन्नानिशालेपे
नवाधुवं ७३ रविदुग्धंसुधाकांडं कटुकालयपल्लवाः करंजोवन्नमूत्रेण लेपनेश्रेष्ठमर्शसां लवंगवारुणीदेवदाली
वीजगुडैः कृता वर्त्तिर्गुदे विनिर्दिष्टार्हर्षाहेतिसमूलतः अम्लकांजिकसंपिष्टसवीजकटुतुंविका सगुडाहंति ले
पेनहर्षमामूलतोद्भुतं ७६ पालाशभस्मतोयेनत्रिगुणेनसगोमूत्रे पक्वंकटुत्रयोपेनभक्तं हर्षविनाशकृत् देवदा
लीफलोद्भूतचूर्णसैंधवलेपतः गोमूत्रेनाग्निमूलस्यपानेवार्शोविनाशकृत् ७८ नवनीतावितारूसतिलान्भुक्त्वा
निवारयेत् अर्शांसिमासमात्रेण यद्वासूरणभक्षणात् ७९ मशालीमूलचूर्णंवागोमूत्रेणनरःपिवेत् तक्राशीतस्य
नश्यंतिहर्षामासेननश्चितं ८० लवणेनारनालेनपिष्टानिंवस्यपल्लवाः गदव्याधिहराभक्ष्याकरंजोगोलजेनवा ८१
कर्कटस्यविलोद्भूतमृत्तिकांशोणतोयवा नारंगमूलिकावद्धाकटौहर्षाविनाशिनी ८२ हर्षानिवारणं अर्शोनिवार
णं यवक्षारान्वितं शुंठीचूर्णलीढं घृतान्वितं उष्णोदकेनवापीतं शुंठीचूर्णंदलयाकरे कणासिंधुशिवावह्निचूर्णमुसे

नवारिणा पीतंप्रातःदग्धोत्कुर्य्यान्नावकस्मात्तिदीपनं ८४ कपित्थतक्रचांगेरीमरिचाद्याजिविरचकैः कफवातहरोग्राही·
बल्योद्दीपनपाचनः ८५ धान्यजीरकसंसिद्धं चूर्णमग्निविवर्द्धनं रोचनंदोषशमनंवातपित्तविनाशनं ८६ मंदाग्निदीपनं
वेदनंकेसरंलाक्षालवंगमधुपत्रकं षष्ठामामसर्पिवनःकोलिबीजंलेहःसितच्छर्दिजित् ८७ मातुलिंगरसोलाजासैंधवंच
तपाचिते हिक्कावांतिहरंपीतंपाचनंदीपनंहितं ८८ गुडूच्याःश्रीफलस्यापिकाथोमधुविमिश्रितः त्रिच्छर्दिहृत्समेपी
तेशीघ्रंतंदुलवारिणा ८९ पीतावातिप्रशितेहन्तीच्छर्दिहृतंडुलांभसा अजमोदाप्यथवावातच्छर्दिहृद्धकभक्षिता ९०
अश्वत्थवल्कलंवह्नौज्वलन्निर्वापितंजले तज्जलेपानमात्रेणछर्दिहरतिदुर्जया ९१ कुलीरगर्भंपानीयंपीतंस्वच्छंदि
मोपमं वमनंवारयत्याशुपथ्याशीतंज्वनाशनः ९२ मयूरपित्तसंभूतभस्मनाविहितागले रेखाच्छर्दिहराविरमपित्ता
बल्लशास्त्रयः ९३ इतिछर्दिनिवारणं जलेमलयजेरक्तचंदनंपद्मकंसमैः उशीरेणान्वितोलेपोमस्तकेतृड्निवारणः
पलानीलोत्पलंकुष्ठंप्ररोहोवटजोमधु पत्रकूटीमरवांतस्यात्तृषांहंतिसुदारुणं ९५ कुशाकुशेजलंयंषिलीजाभृतमेन
वारिणा पीतामूर्णांतृषांहंतिप्रातःशोभरिवांशुमान् ९६ तृषानिवारणं भल्लातंपिप्पलीमूलंपिप्पलीकाथितंजले
उष्णंतेभहरत्याशुपीतंपथ्याशिनोनिशि मूलाबीजसमंवाहगंधारसफलान्विता मृत्तिकोन्मूलनाद्विनसमूहंलेमं·
शामनयेत् ९७ मृत्तिकाज्वर पिप्पलीपिप्पलीमूलंभल्लातकफलानिव कल्कंमधुघृतेपीतंकुष्ठलेभाद्भिमुच्यते

५५

ऊँ॰
६३
63

मधुसर्पिषवल्मीकमृत्तिकासंयुतैरिमैः कृतिंवलेपनेशीघ्रमूरुस्तंभनिवारणं १॰ऊरुस्तंभश्च वहुकालीननिंवस्यमूले
शीतेनवारिणा निचूर्णरेचनंवातेपीतेहंतिप्रलेपतः शेफालीपल्लवक्वाथः प्रातःपीतेचरेचनी शृंगालवल्लभावाथ
भक्तान्नेननिर्हंतितो २ तगरस्यशिफाशुंठ्यांमथ्यतेनाईकान्विता रेचणंहरतेपीताकाभिविंशयथोगना ३ रेचनी
वातघ्ने सर्पिषागोपयोमिश्रसक्तुभिःलेपमात्रतः शतावरीशिफाफेनलेपोवाहिप्रतापमन्त ४ सैंधवंमदनोशीरमार्पि
मधुगुरेगुडः गैरिकंस्फुटितौपादौलिप्तौस्यातेकजोपमौ ५ मदनान्वितसामुद्रलवणंमहिषीभवं मृद्वणेतापितेलेः
पात्पादौस्यातेकजोपमौ ६ स्फुटितपादप्रतीकारः मदनोहिजेलापीतःपरिणामोथशूलहृत पिप्पल्येलाघृतेभक्ता
वातरोगविनाशकृत ७ नीलीमूलंपयःपीतेहृदयरोगविनाशकृत आमवातहराशुंठीगुडूचीसघृतासिता ८ शि
गुमूलमपामार्गंलवणंसहदेविका मूत्राजीर्णहरोयोगोमाहितांशुष्यभोजनो यवानीशर्षपाहिंगुसैंधवेभार्दि
तेङ्गुते वालाजीर्णहरस्तेवकुपत्रःसक्तुलेपथा ९ स्नुहीदीरेणसंभिन्नपिप्पलीचूर्णभक्षणात् सप्ताहेनप्रशमेया
तिविरजातेजलोदरे महिषीमूत्रपानाद्वावहिवास्नकमूलिका कांजिकेनसमंपीताजलोदरविनाशिनी १२ विस्त्र
कोतोऽङ्गवंमूलेतक्रपीतेनिर्हंतितत्र नागकेसरमूलेवामधुसर्पिःसमन्विते १३ चित्रकंपिप्पलीशुंठीववासैंधवमा
र्द्रकं विल्वहरीतकीपक्वंकांजिकेनसमासतः १४ पित्तकासमनीसारेहृद्रोगेवातगुल्मके प्लीहाजीर्णज्वरान्हंति

क्षारं वा पानतो विराग् गुडेन केतकी क्षारो भक्षितः कदलीफले चित्रमूलान्विते वाथ प्लीहां हन्ति दिनत्रये १६ एरंडनालमूला
नि दग्धान्येतरप्यमतः जलेन गोजलेनापि प्लीहा नश्यति पानतः १७ भल्लातपिप्पलीमूलक्वाथो ये पानतो हरेत् हृद्रोगं
गुल्मामशूले वाडर्द्धे रेप थ्यभोजिनः १८ पिप्पलीबीजपूरे च समे मस्तुना संयुते हृच्छूले भक्षिते हन्ति हृद्रोगं वातिदारुणं १९
उशीरमागधीमूलचूर्णं पीतं घृतान्विते गुडेन बीजपूरेण रसो हृदयशूलहृत् २० तक्रं पीतामजे वापि मस्तुवेन हृहतीशिफा
पडवायाश्शिफा पीता मधुना हन्ति तं डतं २२ शमीपत्रोद्भवं चूर्णं गोधूमकणिकान्विते पोलिका सर्पिषा भक्षा करी वात
विनाशिनी २१॥ क्षीरेण ग्रस्तरी पीता कटिशूलविनाशिनी पणखेटकशिफा वा पक्वक्षीरपीता निहन्ति तं २३ करंदमूलिकाक्षी
रेक टिशूलविनाशकृत् जालिनी गोजला पीता कुंतविनिहन्ति च २४ इक्षुपञ्चोयवक्षारो मूत्रकृच्छ्रविनाशकृत् कांजिकेन
निशा पीता सगुडा मूत्रकृच्छ्रजित् २५ कूष्माण्डस्वरसः पीतः सितया मूत्रकृच्छ्रजित् नालिकेरस्य पुष्पं वा क्षीरपीतं निहे:
तितमम् २६ शतमूलीशिफा भक्षा सितानाशसंयुता अपामार्गस्य मूलं वा मूत्रकृच्छ्रविनाशने २७ मूले भद्रजटोद्भूतं वारिपी
तं घृतेन वा श्वेतसिंवादिका मूलं जयमरी हन्ति पानतः २८ अश्मरीमल्लसंयुक्तो यवक्षारो विनाशयेत् बीजपूरशिफा शीत
वारि पीता निहन्ति वा २९ यामनः कुमारिकापत्रं दारयित्वा प्रवेशयेत् वर्मकीलेषु निर्मूलेतेन श्यति दिनत्रये ३० वनडाक्षा
दलैर्घृष्टा स्मलस्याः कटेन वा भृशं वर्मकीलाः पतंत्याशु छिन्नमूला इव द्रुमाः ३१ वानारिपत्रचूर्णेन निघृष्टा श्वमेकीलका :

ॐ
६४
64

रक्तालिमाः पतन्त्येव यथा स्मरारणेगणे ३२ स्वर्जिकावारिमध्यस्थ स्यादम्लांशो विलेपिताः चर्मकीलाः लयं यान्ति दुर्जनाव्य
सने यथा ३३ दग्धकांडेन काण्योस्याः स्वेदिताश्चर्मकीलकाः जलादिसर्पनिर्मोकनिचयः पतति भुवि ३४ चर्मकील
प्रतीकारः सिक्थसर्जरसो जीर्णं चूतपक्वं वहेदेवं लेपतो वह्निदग्धस्य दुःखं भूतंजयो यथा ॐ भूतंजयाय स्वल्पा
णायेह र २ वह्निं शमय २ जेसः ॐ फट् तिलतैलेयवादग्धाधतल्वेपेन निश्चिते वह्निदग्धव्रणारोहं यान्ति दुःखं प्रशाम्य
ति ३६ महिषस्वलाण्डमध्ये स्वपिष्टतिलसंयुते पोपकं हन्ति प्रलेपेन मल्लातकं भवेत्स्राणात् आग्नेयदाहं शान्ति दलैः सर्वंचे
लेनाक्ताः सर्वथैपिंडबंधनात् खड्गादिव्रणसंरोहः सप्ताहेन ध्रुवं भवेत् ३७ सर्वेड्सर्पिर्षा पूर्णो व्रणः श्वेतवस्त्रेण वेष्टितः प्रश
मवेदनो दोहे शस्त्राघातोद्भवं त्यलम् ३८ बाणगुंषाशिफादंतच्छर्विताऽतद्वसोथवा महिषाः पुत्रजन्मो मवचीले पोपिरो
हन्त ३९ घृतिगलन्ति चाता हाविरजाता दहर्निशं दंताति पिष्टतत्र निष्ठीवदेपदोव्रजेत् ४० चर्विता होतशर्गेन स
हदेवीरसेन च श्वेतवस्त्रेण संवेष्टा नवो घातो निरोहति ४१ लज्जापाठषुंखाणामेकैकं जलमर्दितं मूलमालेपमात्रेण शा
स्त्रघातप्ररोहकृत् ४२ काकजंघाप्रलेपाद्वा शस्त्रघातं दिनत्रयात् पाकं प्रति विना रोहं नयत्येव न संशयः आगन्तुकं व्रणं स
पूर्णो बद्धः सश्वेतवाससा घातो रोहत्यमायाति प्रतिपाकं विनाद्भुतं शिरीषलज्जिनीमूलखंडेखंड समन्विते व्रणं संरो
हयेत्पक्वं तैलस्वेदेन शस्त्रजे ४५ अपामार्गशिफाभोभ्यां पक्वं तैलं निहन्ति वा स्वेदेन शस्त्रसंजातं व्रणमर्कस्त्वमो यथा ४६

मंजिष्ठा त्रिफला निंबो हे निशे मधुयष्टिका फलं कायस्य पिंडीय मरोह व्रणरोहिणी ४७ व्रणप्ररोहकमायाः कंदः विडसम-
न्विते पक्वे तैले व्रणं हंति स्वेदतः शाल्मसंभवे ४८ अपामार्गस्य पत्राणां पाणिसंपुटपीडनात् शाखघातोरसेदश्चे गलद्रक्तं नि
वारयेत् ४९ लांगलीकंदकंदेन सर्वविघातस्य लेपतः चिरमेतः स्थितं शल्यं निःसरत्येव तत्क्षणात् ५० मेषशृंगस्य मूलं वा
मूलं मूत्रस्मरणी भवं जलपिष्टं प्रलेपेन नष्टशल्यं समुद्धरेत् आयष्टिमूलिकालवैर्निशाविडैः समन्विते पक्वे तैलप्रलेपे
न समं नाडीव्रणं नयेत् ५५ निंबपत्रैस्तिलाद्दंती त्रिवृन्मादिकसैंधवं दुःखव्रणविनाशाय लेपपथ्यं सदा हितः ५६ त्रपुसी
पत्रधत्तूरकर्णमोटीकुबेरकाः सकृत्सलेपमात्रेण सनीघ्रं व्रणरोपणः ५७ प्रियंगुमूलिकाचूर्णं भावितं माहिषं दधि
कोद्रवान्नं च संभुक्तं नाडीव्रणविनाशकृत् मेघनाद शिफातालसमां शाणवुधाविता तन्मध्याचरिता नाडी शमं याति वि
रोद्रवा घृतसिद्धार्थतैलाभ्यां घृतादेवप्रलेपतः स्नतपेती शिफा वाथ नाडीव्रणविनाशिनी स्वर्जिकासैंधवं दंती नीली मू
लं फलं तथा ५८ सूत्रे च तद्गुणेः सिद्धं तैलं नाडीव्रणापहं नाडीव्रणचिकित्सा रक्तमंडलकं चूर्णं फेनाकेनोपशाम्यति
शीतपानीयसेचूर्णं पलाशफललेपतः सविडंगो यवक्षारः शुंठीगंधकसंयुतः सरपत्रयुता लेपाद्भावयत्सर्दुं दद्रूणा
त् शिग्रुमूलकबीजानि समसिद्धार्थानि सोमवी ५९ यवोन्मत्तकपिष्टानि त्रिफलेति लेपनवाद्रुंदं उनेंडकी भवं मूलं मूत्रे वि
पिनोद्धृतं अर्बुदं गोडमालां वा सद्यो हंति हि लेपतः ६० विधिः शुष्कार्कैः पत्रैरेरंडनिर्गुंडीवर्षाभ्वाशिग्रुशर्षपैः प्रलेपा

ॐ· ६५
65

दद्रुदंष्ट्रेतिविरोम्यमतिदारुणं ६१ अजोनः कटुतैलेनचतत्रसैंधवसंयुतं पतत्रस्येनिहंत्येवगलगंडमसंशयं ६२ गेडार्बुदप्रतीका
रः कपिलाःकृमिदेशास्यागोरःपृष्ठेसमाश्रितः अंगासंधिषुसर्वेषुमृत्युकालोप्यवस्थितः ६३ पिंगलोमस्तकेहंतिवि
जयोलोचनेतथा हस्तेपादेवजंघायांविक्षेपःकलहप्रियः कुंभकर्णःस्थितोयोनौमेढ्रस्थानेविभीषणः हृदयेचंडवक्त्र
स्तनासायांसोमलोचनः ६५ खरदूषणनामायपृष्ठेचकेहिंडुवकः स्तनयोःपार्श्वयोर्जंघयोगर्दभःप्रियदर्शनः ६६ सुपी
तेमंडलेस्थूलेजायतेकपिलादिते दाहश्चोडःसहस्तेनंकथ्यतेमंत्रसंयुतं गर्दभोऽडेववाकृष्णेगर्दभस्यव्रणानिते पक्षा
लेपःसपोक्कथोदहेनाद्विषशांतिकृत ॐनमोभगवतेरुद्रायपरुन २ छिंद २ चंद्रहासखड्गेनस्वाहा पूर्वाभिमुखंगर्दभमा
लिख्यतेनमंत्रेणतस्यशिरोनिकृंतयेत् अर्कमूलेपिपेगुच्छकेकुंमेनागकेसरे तंडुलोदकपिष्ठानोलेपेयंगोरभद्रि
ते ६९ ॐनमोभगवतेरुद्रायछिंदे [illegible]नाहुंफट्स्वाहा अस्यालेपोमृत्युकालस्यपिंगलेतेत्रमुच्यते कृष्णचंदनगोमूत्रे
लैपस्तुविषनाशनः ७१ ॐनमोभगवतेरुद्रायमहाश्वेतरावणस्यवधार्थायछिंद २ सुदर्शनेनहुंफट्स्वाहा अग्नेयांगर्द
भमालिख्यतस्यशिरोनिकृंतयेत् सौवीरपिष्टवाहारीलेपोविजयमर्दिते ७२ कलहप्रियदष्टस्यतंत्रेमंत्रश्चकथ्यते
ॐनमोभगवतेरुद्रायमुहु २ क्षिपि २ हलेनहुंफट्स्वाहा दक्षिणाभिमुखंतमालिख्यशिरोनिकृंतयेत् छागाड
ग्यान्वितैलेपोमर्कटस्याशिरोमभिः तद्विष्यःदायनेकुंभकर्णदष्टस्यकथ्यते ७४ ॐनमोभगवतेरुद्रायरुरु २ छिंद

वेद्दहासेन हूं फट् स्वाहा नैरृत्यामभिमन्त्र्य लिखित्वा अङ्गान्दीरेण कृष्णोडुवीजलेपः सर्वावहः विभीषणेन दष्टस्यनृगवि
षाण्मन्त्रमुक ॐ नमो भगवते रुद्राय छिंद २ स्वाहा पश्चिमामभिमन्त्र्य तन्मालिख्य हिं पात वर्णो निर्वो हरिद्राव चेदनं मरिच
कणा वेद्दवक्रोणा दष्टे स्यादेतल्लेपो विषापहः ॐ नमो भगवते रुद्राय कुटकीदेश्वरमेवेनितिविमर्दय हन २ स्वाहा उत्तरामभि
मन्त्र्य गर्दभमालिख्य नेनमेत्रेणतस्याशिरोनिकृन्तयेत् शिरीषाङ्घ्यपत्राणि फलं मूलं च वल्कलं सौम्यलोवनदष्टे स्या
देतल्लेपो विषापहः ॐ नमो भगवते रुद्राय स्वाहा ईशानामभिमन्त्र्य तन्मालिख्य तच्छिरो भिकृन्तयेत् द्वावसाध्यावविज्ञेयोहि
डुवरत्वरदृषणौ कालेनप्रेरितात्वेदष्टे स्यादेतल्लेपो विषापहः ॐ नमो भगवते रुद्राय स्वाहा, नो गलन्तो देहिनां किल ज्वालागर्दभ
प्रतीकारः वेसरीमूत्रसेकहृष्टसौवारीमूलनस्यतः अपस्मारः शमं याति यथा डुष्टोनिपीडितः ७९ कणामरिचशुंठीनां चूर्ण
एं श्मशानवह्निना वत्तर्दश्यामया हस्मांनवभोडेसुपाविते ८० स्त्रीचिताग्नौ हृदरोहे सोनराग्नौ योषितस्तथा एतत्रसम
पस्मारं नस्यांते क्षीरभोजनं तरुलेवितचोरस्यगलपाशकृतामषी पीतेन वारिणा पीता हेत्यपस्मारमज्जते ८१ अश्व
सलर्षि निर्यासो निर्जलः पटगालितः तन्नस्यान्मानवोवश्यमपस्मारेण मुच्यते ८२ हरिद्राहिंगुनिर्गुंडीपत्रमूलर
सास्रव नस्यात्पानादपस्मारं निवारयति देहिनः ८३ अपस्मारचिकित्सा धात्रीफलेभदंतोष्य मषीमंकुरसान्विता प
कतैलघृतालेपात्वलिं कुर्यात्कचान्विता रसांजनमजाडुग्धः घटडुग्ध मदंतजा मषीलिप्ता त्रिभिः पल्लीमेकशाजायतेध्रुवं

ॐ
९९

66

गुंजाफलमज्जोरंकुरसः कुष्ठंमृगराजरा तकयुतेपाचितंतैलंकेशदृढिकरंमतं ८८ गुंजामूलंफलंवाप्यभल्लातंवृहतीफलं मधुले
पात्क्रमेयातिशक्रलुप्तमसंशयं ८९ कसगोमूत्रसंपिष्टजयापुष्पप्रलेपतः वृद्धकेशान्वितंचित्रमिंद्रलुप्तंप्रजायते ९० वृह
तीफलसंयुक्तंगुंजामूलंफलंतथा तल्लेपान्नश्यतिह्यिमिंद्रलुप्तमनेकधा ९१ मधुकत्वक्तिलाःकोलिफलमज्जाश्व
गंधधा नीलोत्पलयुता श्यामालिप्ताःकेशाःपतंतिन ९२ मांसीनीलोत्पलांभोजशिवाभिर्लेपिताःकचाः विरलाअपि
जायंतेद्रुतंभृंगनिभाघनाः ९३ पथ्याधात्रीविभीताख्यचूर्णंगुंजाशिफारसः कपिकच्छुरसोमीषांलेपःपालितनाशनः ९४
कुरंटसीलिकाभृंगकेतकीमूलजारसाः काकिनीमूलबीजंचतैलायकिशिफाजलं सर्वंतैलमितंपक्वामासमासर
येद्भुवि तेनाभ्यक्ताःकचाःश्वेताजायंतेभ्रमरोपमाः ९५ ग्राम्यबीजान्विसेधीजीफलचूर्णेर्विलेपिताः वद्धमूलायनादीर्घा
जायंतेकुटिलाःकचाः उत्पलंकेसरंयष्टिमधुधात्रीतिलाःसमैः लेपितेमस्तकेशीघ्रंउपहासोविनश्यति ९६ निहंतुक्ष
मसंदंशंरविदुग्धसमन्वितं माषचूर्णमपामार्गतैलंलेपःकरोगहृत् ९७ किरिमालाःशिवालाद्वावकमर्दस्यतंडुलाः
एतच्चूर्णकृतोलेपोमस्तकेदारुणापहः १० गोमयोद्वर्तितंसर्वंकीकसंचजतिवंधु वरणस्यजलापिष्टपत्रोद्वर्तनतोवि
नात् ११ पक्काऽपामार्गबीजानिशर्षपाहलिनीसह निर्गुंडाचाशिरोरोगंघ्नंतिलेपेनवेगतः २ कृष्णभृंगंकर्पूरेकुष्ठंनचूर्णं
तिलसंयुतं शिरःकंडुंतथादाहंवेदनांहंतिलेपतः ३ गुडोदकेनवालिमाःपक्वाविल्वस्यमज्जया विरलाःस्युर्दृढालग्नाः ज

लपोनोः कचावनाः फणिवल्लीदलोद्भूतरसमर्दितपारदः तद्विमाचीविकारहेति यूकाः शिरसि संस्थिताः ५ शिलागंधक
गोमूत्रविडंगकटुतैलतः यूकानश्यंतिनिःशेषाः सर्लिक्षाजीविताव्यपि ६ कोमूत्रेणविसेचूहविल्वमूलस्यलेपतः
नश्यंतिशिरसोयूकाः सहलिक्षाभिरञ्जते ७ पुष्पेशिखिशिखामंकुरसस्विद्धगवाम्भतः कृतेनमूत्रस्नानश्यंतिपलि
तानिमिताशीनः ८ विभीतनिंवचल्वभारीशिवाशेलुस्वकाकिनी पकैकतैललेपेन पलितेनश्यतिध्रुवं तिलान्वितम
हाकालवीजंतैलंहिनस्यतः दुग्धाहारस्यमासेनपलितंहंतिनामयथा वहथाकांजिकापिष्टपक्वशेलुफलोद्भवा म
जालिप्तेकेसंतमेलोहपात्रेप्रजायते १० तैलेतेनकृताभ्यंगेनस्यवादीरभोजिनः काशपुष्पनिभाःकेशाः जायंतेषयदोप
माः ११ माषचूर्णंपुटंदत्वंचूर्णंसीसकसंयुतं यत्नाल्लिप्ताःकचाःकृष्णाजायन्तेषयदोपमाः भृंगाश्वमारलोहानित्रिफ
लासननीलिका लेपनःसुःकचाःकृष्णाःश्वेतगुग्गुलधूपिताः १२ पंकायोभृंगमार्कंदवीजंनीलिफलत्रयी सलोहं
कांजिकंवैषोलेपःवः पलितनाशनः १३ प्रपामानगरकर्पूरनिशागंधकलेपनः विगतःपांडुरैःकेशाः कृष्णागुग्गुलधूपि
ताः १४ भृंगचूर्णमयश्चूर्णंत्रिफलाकृष्णमृत्तिका मासमिक्षुरसेनिमंतल्लेपः पलितापहः १५ कुष्टैरंडप्रपुंनाटैरम्लकां
जिकलेपितैः लिप्तेपीतःप्रशाम्येयातिमस्तके तत्क्षणमात्रतः १६ आरभालेनगुंजायादालिपिष्टप्रलेपनः शिरःस्थूलंप्रशमयाः
तिशुंठीनस्यनवाध्रुवे १७ कुष्टमेरंडमूलंचलेपःकांजिकपेषितः शिरोर्तिनाशयत्याशुपथ्यंवामधुकैरजं विडंगस्वति

ॐ
६७
67

कादंतीहिंगुगोमूत्रसंयुते विपक्वं शार्षपं तैलं कृमिघ्नेन समन्वितं २० माषमूलस्य नस्येन किं वा श्वेतापराजिता रसेन स्यात् शिरःपीडां
ध्रुवं हन्यति वेगतः २१ आरनालेन संपिष्टां पिप्पलीं मरिचं शिला पत्रलेपेन नश्यन्ति शिरःशूलान्यनेकधा २२ कांजिकापिष्टमूल
स्य मेषशृंगराजस्य नस्यतः पूर्वं शीर्षे स्थिता पीडा शीघ्रं ते वा प्रसर्पति २३ शिरःशूलप्रतीकारः बिल्वस्य देवदारोर्वा तैलाद्येव सवे
ष्टितान् तप्तनालाहृतस्वर्णे कर्णे शूलं प्रशाम्यति २४ देवदारुवचाहिंगुमिश्रापध्यीकृतसैंधवं गोमयस्य रसस्तैलं पक्वं रोगहरं
स्मृतेः लशुनार्द्रकपत्रेण वेष्टितानापिताजले तत्पूर्णे कर्णे शूलस्य प्रशमो जायते क्षणात् २५ स्नुहीतैलेन संपूर्णे श्रातवीसे
पवान्विता मेषमूत्रमृतेतेन कर्णे शूले प्रशाम्यति गोमूत्रसहिते कर्णे पुष्पपत्ररसेन वा जाताः शतावरीमूलरसेन मधुनास
हा २७ शूलं शाम्यति वज्रा वा पयः कोष्णेन वा विणा श्रवंतमूलनिर्यासः कोष्णो वा कर्णे शूलहृत् २८ उष्णेन वारिणा पिष्टं
त्वदंतोत्पलशिफारसः कर्णे दग्धे दिनि निः शोष्टंति शूलं सदारुणं २९ कृष्णभ्रमरिकापत्ररसस्तैलसमन्वितः सकांजिको
विनिहन्ति मः कर्णे जंतु विनाशकृत् जंबूपत्रं फलं तत्क्वथने दशेनाति पूरितात् पतंति कृमयः कर्णाद् बिंदुनीता उ वा परि ३१
दं एरंडोत्पलशिफाकर्णे निवद्धा कर्णे शूलहृत् बिल्वपत्ररसस्तैलं समस्तं वा प्रपावितं ३२ कर्णे स्रावप्रतीकारः धामराशि
स्थिते सर्पिर्मे हिषादिन विशाति मूशलीचूर्णसंयुक्तं कर्णपालीविवर्द्धनं ३३ प्रसूतमहिषीदुग्धनवनीतादि वेष्टते गुं
जादाली यत्पूर्णेन युते वृद्धिकरं स्मृतेः कटुतैलीफलं तैलं विषगर्भं स्रवपाविनं पक्षोभ्यंगेन तत्क्रम्यो कर्णपाली सुविस्तृतो

अश्वगंधायवामाषामरिचंकुष्टसैंधवं पिप्पलीश्वेतसिद्धार्थामयरक्तगरोमधुः बृहतीफलमेतेषांचूर्णेनोद्वर्तनेकृते स्तन
श्रवणालिंगनोवर्द्धनेस्यात्पयोवृथा स्तनकर्णध्वजहस्तकरणे जमेनारुणमंत्रेणवारिणालोचनद्वये क्षालितेशाम्य
तिक्षिप्रमक्षिपीडानिडःसहा ३४ ओंश्रुरुणाक्षेफट्स्वाहा श्वेताश्वमारपत्रोत्थरसपूरितचक्षुषोः उत्तेपीडाशमेयाति
रजोनीरोहरंयथा ३५ सूतकंगंधकोपेतंबोगेरीरसमूर्छितं अंजनेदृष्टिदंनृणांनेत्रामयविनाशनं अपामार्गशिफा
घृष्टामधुनासैंधवेनच ताम्रपात्रेमृतानेत्रेहंतिपीडांजनड्वं नागरंनिंबपत्रंचपिष्टलोपेनसरणात् वकारकामूलप
र्णोत्वाचक्षुः शूलंप्रशाम्यति ३८ प्रातर्हंजलसंपूर्णमुखंतालयतेदिणी प्रातर्योमवतेरोगैर्लोचनोत्थैःप्रनिश्चि
ते मधुशिग्रुदलोद्भूतंरसपूरितलोचने विमुंचत्यक्तजापीडानरेचेश्वपवानिद्रेन ४० अश्वमूत्रेणसंघृष्टकारवल्लीशि
फोजनात् लोचनस्याशुमेयातिनीलीभ्रलीयथांभसा ४१ छागमूत्रेणसंभिन्नेदेवदारुरजोभवे पक्ष्मलेनयतद्वं
द्वंजायतेश्रामिपिबटे सिद्धार्थसेनसंपिष्टाहरिद्राकतकेकणा धात्रीफलंचतद्वर्तिःरात्रिरोगविनाशनं ४२ नरास्थितः
नवोद्धिनपक्वामलकवारिणा नेत्रपूरमेभृतेपीडाशीघ्रंप्रशाम्यतिडःसहा ४४ सक्वापाणितलेघृष्टाचक्षुषोर्यदिदी
यते अविशेषेणवनहारितिमिराणिवयोहति ४५ श्वेतैरंडशिफापत्रयुतेच्छागीपयोग्निना तापितंस्वेदितंचक्षुर्वातसू
लंप्रशमंनयेत् ४६ चंदनंसैंधवंपथ्यारसोवद्यातरोग्नतः क्रमहृद्यांजनेहंतिपटलंडषनीलिके ४७ सितापराजिताम्

ओं. ६८

68

लेपयेद्वा पुनर्नवा वारिपिष्टा दिनैः तिमिरावद्धः शुक्लविनाशिनी ४८ पालाशरससंभिन्नारक्तमालस्य बीजजा वर्तिर्वद्ध
प्रयुक्ताक्षीहन्ति शुक्लं चिरोत्थितं ४९ मस्तुरसेनाभयाजाच्चूर्णं बिभीतफलमज्जया प्रदोषेऽञ्जितनेत्रस्य शुक्लं क्षिप्रं प्रणश्यति ५० निशा
ध्यं नश्यति क्षिप्रं मधुकर्णमलाञ्जनात् कट्फलं वा मधुयष्टी हन्ति तिमिरं मधुनान्विता छागमूत्रेण संघृष्टं भद्रमस्त्वञ्जनेन वा चिर
कालोत्थं शुक्लं रक्तं च निहन्यते तेन लोदकसंघृष्टं भद्रमस्तोतुलस्याम्लनस्यतः पटलं दीयते दिग्यं भेदवातहतं यथा ५३
भृङ्गराजशिफा तैलं लवणेन तथाभसा ताम्रघृष्टाहरत्याशु भृताने नेत्रे निपिचुटं ५४ अपामार्गजटाताम्रे निघृष्टा वल्लवे
जनात् पिचुटं शालयत्यवरविरेचिनैर्हिमं यथा ५५ मांसानि वापक्वाणि निर्यासः शोणितापहः निशाध्यं भ्रमरीपत्ररसे
दिग्धपूरितेव्रजेत् ५६ अपामार्गशिफा गव्ये मस्तुसैन्धवरोचना ताम्रघृष्टाहरत्याशु पटलं लेनयनद्वयं ५७ कटुतुम्बीरिका
पत्ररसो मरवसंयुतः निशान्ध्यं नाशयत्यक्ष्णोः प्रदोषे पूरिते सति ५८ अलिप्रहारजे दुःखे विल्वागर्भं मस्तुकोमले चूर्णि
ते पूरिते नेत्रे शमयत्यतिवेगतः ५९ निघृष्टं मधुनारक्तचंदनं वल्लरं जनात् तिमिरं हन्ति ताम्रसैन्धवतराणिः किरणैर्यथा ६०
धात्री पथ्या बिभीतानां फलमज्जा निघर्षिता वारिणा पूरिता वल्लात्तिमिरं हन्ति निर्भरं ६१ पारदं सीसकं तुल्यं ताभ्यां द्वि
गुणमञ्जनं ईषत्कर्पूरसंयुक्तमञ्जनं भयनाशनं ६२ अक्षीणि तिलपुष्पाणि मरिचानि च षोडश पञ्चाशज्जातिपुष्पाणि ष
पिप्पलितण्डुलाः ६३ लेपेन तिमिरं हन्ति निशान्ध्यं हन्ति मस्तुना लोहितं वारिणा हन्ति काम्लं कांजिकेन च प्रसंगा

तिपुष्पाणि यावक्रोरक्तवेदने गुटिकाहंति तासंघं तिमिरे पटले तथा ६५ शुंठीमधुघृतं मस्तु त्रिफलाक्वाथलेपयः गोमू
त्रेसीसकेसिद्धं मंजने सर्वरोगहृत् ६६ उत्पलं सैंधवे रक्तवेदने त्रिफला तथा निशांधे तिमिरे त्रैतिपटले वद्धरंजनात् ६७
विल्वमूलरसौ वाह मूत्रशुक्रो तिवेगतः पटले नीलिकाहंति कुसुमंः स्नामिने यथा ६८ तमतिमिरिकावक्रे नीलीरसस्राव कुसु
मपटले च अपहरति नेत्ररोगान् गुडूचीरसं सैंधवं मधुना ६९ नारेणकनकेनाथ घृष्टाऽजेणेन नश्यति अंजने मधुरसापिका
णलपेदितेनच ७० काशिसंदकुशिसंदकणासितं शशुमस्तके अतिपापिजने संदमामपि संदलीवते ७१ अक्षिस्फुर
णनिवारणमंत्रः इति अक्षिरोगप्रतीकारः अथ कामलाः गुडार्द्रकयुता हंति कामले त्रिफलासिता जालिनीफलमात्रा
तेन संस्रावातंडुलोमसा ७२ एरंडमूलिकापीता मधुना हंति कामले द्रोणपुष्परसोपेता रोचनालोचनांजनात् मधुरमूलि
कापीता सतक्रा कामलापहा विसक्रोनाशिफानक्रपीतावातविनाशिनी ७३ सश्वेतयिटिकामूलं मधुक्षीरघृतेन तथा
धात्रीमूलेसतक्रेण पीते कामलनाशने ७४ जालिनीफलमध्यस्थं श्णमाशार्षयनस्यतः किंवातोयेन संपिष्टा कुमारी
केदनस्यतः ७५ द्रोणपुष्पीरसेनवद्धः श्रवितेयाति कामला हिंगुवोलोवनेनस्तः कामलोन्मूलने क्षमः जायते का
मलापितान्पीतनेत्रोगलक्षणात् वेध्याकर्कोटिकाकंदनसे साचोपशाम्यति ७६ कावमावोघृतक्षित्राभद्रि
तादिनसप्तकं कामले हंति यंवागदेवदारुस्तेनसेकत ७८ कामलाप्रतीकारः जेतपत्ररसोमूर्वारसोदाडिमपुष्पयु

ॐ: ६५

69

कृ नासायां नस्यतो रक्तं पानाद्धारयते निशि कटुतैवी निशाजीर्णोपिघ्राणीतेन वारिणा नस्यतो हंति नासायां रक्तहर्षो मसंशयं ८०
निवान धारयेद्रक्तं नासायां योगोह्यतान्विता शर्करान स्यतो वश्यमापदं कालिकायथा ८१ गृहधूमकणादारु क्षारनक्ताह्व सैंधवैः
सिद्धं शिखरिवीजैश्च तैलेनासागदापहं नासारोगप्रतीकारः निशाजीवंतिकादारु मंजिष्ठाशालितंदुलैः मुखरोगहरं
द्रुरुयेसिद्धे सिंधुत्वनान्विते ८२ गुडेलवणसिद्धार्थ हरिद्रामरिचैः कणा चूर्णमस्यांभसा वक्त्रे धृतेन द्रोगनाशने तिलतैले
नसंपक्कः कटुतैवी क्षदोद्भवः रसोहंति मुखान स्यः पक्वतेंडमसंशयं मुखरोगहरस्ताश्च निशाक्वाथामुखेधृतः चर्वितादंत
सेलग्रागुडूचीदंतमूलहृत ८८ चर्विताविधृतौवक्त्रे जातिपत्रैर्विनश्यति मुखरुक्वे सरोद्भूतै वीजैः स्पर्दशनादृढाः ८९ शृं
गवेररसोपेतंकेसरैदंतचर्विते दंतजंतून्निहंत्याशु करोतिदशनान्दृढान् खदिरोभानुपत्रेण किंवाशेलुफलोद्भवे वीजे
ति चर्वितादंताजायंते तिदृढाः किल कुलीरपादसंयुक्तं क्षीरंपक्वं सुशीतलं यतमादप्रलेपेन दंतामूलवलेतिनो ९० दं
तमूलेषु दृष्टेषु लवणेनोपशाम्यति कृमिरक्तोद्भवादंतपीडा किंवाजमादया ९१ गैरिकाभोद्धृतै तैले सर्जसैंधवसिक्थके करु
णाभोद्धृते पक्कमोहपादव्रणापहं उडुंवरीशिफापिष्टापीतातंदुलवारिणा यतश्चक्रे स्रावान्नेवारयत्यतिवेगतः सिक्थकेयाव
कापेते कटुतैलेन पाचिते श्लेष्मविपादिकां हंतिलेपतो वेगतोखिले ९४ सिद्धार्थतैलसंसिक्तताखिरोधे सदारुणे तास्वद्वप्
लवैः श्रयेरविदिने शीघ्रं शमं यातिविपादिको ९५ वालाश्रमदनेजातीफलेमरुवकान्विते गुटिकासा स्थितां हंति श्रुतिरोधं सुदारु

णे ९६ स्वरोगप्रतीकारः तांबूलपत्रचूर्णेन दग्धेन वदने सति तैलस्य कांजिकस्याथ गंडूषो हंति वेदनां जातीपत्रैकणैला
जामात्रलिंगदलेमधु यत्लाले हेमवेत्रादः किंत्वरः स्वरनोधिकः ९८ शेफालीमूलिकाभक्षा गलशुंठीविनाशिनी उप
जिह्वाशमेयातिताह्विराशोणितेगते ह्यारिहिरसोवीजेदेवदारोः सपाचिते तैले हंति शिरःपीडां गलरोगं वनस्पति ४००
वर्धिते विधृते हंति दंतकीटं च वेदनां गुंजावराहकर्णीयं मूलमेकैकमडुते जेवानीलीस्नुहीमूलमेकैके दंतवर्धिते विधृ
ते हंति दंतानां कीटं वेदनया सह २ हालिमाश्वरपिकाहेनवलेपे कृतेततः अन्यपार्श्वस्थितो दंतकीटो निपतति ध्रुवं ३ करीर
वर्णराहूवोंदधिसर्पिस्मृपाचिते लेपितादशनास्तेन नवलेनिपतेतिन ४ शशशोणितलिप्तानि किंवाकस्मातिलापयः क
स्तजीरकसंयुक्तात्वेगेन प्रपतिलेपतः ५ गुडेनमधुनामिश्रं स्नुहाणेकोलिमज्जया वकरणस्यतगापिष्टाज्ञागमूत्रेण हंतिव ६
३ गुटीफलमज्जावापिष्टाशीतेन वारिणा प्रलेपान्नाशयत्येव मूर्वीदोर्ध्वगलोत्थिते ७ वेगनाशनप्रतीकारः वेदनेसाभ
यालाद्राववाकटुकरोहिणी यतैलस्पृष्टदेपीतेसमूलाम`` वीहरेत् ८ विडंगमधुकेयोक्तेसैंधवे देवदारुच तैलमेभिः
शृतेनस्यं प्रयुक्तं वापचीहरेत् ९ अपचीप्रतीकारः श्वेतापराजितामूलं विशालायाशिफाथवा गोमूत्रसंयुते पीतागंड
मालाविनाशिनी १० तिलतैलं जपाशाश्वंयावकोर्कपयः समं प्रलेपाद्धंति चैतेषां गंडमालां दृढामपि पुष्पेऽपराजिता
मूलमडुतेसर्पिषाषुते पीतं केशरयावद्गंडमालोपशांतिकृत् १२ यत्नमडेयलेवापिपिष्टातंडुलवारिणा स्फुटिते

उ॰
८०

हंतिलेपेनगंडमालांनिदारुणां कांचनारत्वचःपानान्मुच्यतेगंडमालया कुकुंदरीशृतेतैलेपाचितेतैललेपिते गंडमा
लानिचापिविलयभीतापसर्पंति १४ बलातैलपुत्राभुकागंडमालाविनाशिनः चित्रोहतेगलेवद्धेकंटकेरमूलेननिहंति
वा १५ वृद्धदंडीशिफासार्द्धपिष्टातंडुलवारिणा स्फुरितेहंतिलेपेनगंडमालामतिद्रुतं निर्गुंडीमूलिकापिवरह्यावर
तोयेननस्यपीषा किंवापराजितामूलेच्छृतयोनेनिहंतिना गंडमालाप्रतीकारः उडवरीफपोहिंशुकमसजीरकसंभृता
कपिकच्छुशिफालस्यादयवाडुकरोगहृत् जिंगिणीतरुनिर्यासःकपिकच्छुशिफान्वितः नस्यतोवारिणापिष्टोनाश
यत्यपवाहकम् मेषशृंगमूलोक्थितावाप्युजनयत्यपवाहुके तिलमेरंडतैलेनसेवितेनव्यपोहते अपवाहुकप्रतीकारः
माहिषेमदलेणकुष्टेहयगंधापिप्पलीवचाहविकलेपःकार्योयोःस्तनयोरपि तंडुलोदकसंपिष्टाकुरुतेवनमे
जका नस्येनपीनमुन्नतंगेयौवनेयोषितोघने २२ बलाहाल्लिवलाचूर्णंमाहिषेमद्दलेणवचा कुष्टलेपःस्थिरंपीनेयौ
वनेयोषितेघने बलाहाल्लिवलाचूर्णंमाहिषेमदलेणवचा कुष्टलेपःस्थितेपीनेकुरुतेयौवनेस्थिरं २४ दाडिमीवल्क
लेनतैलसिक्तकर्कवाथितेत्रयं मलेवौलेपितःकर्णाकुरुतेयौवनेस्थिरं २५ महिषीगोघृतेश्यामावचालजाकडूतिमग
पक्वतैलेहिनस्येनकुरुतेस्थिरयौवने २६ मेडीचूर्णकषायेनघृतेतैलेसपाचिते पतितेयौवनेनस्यात्पानादस्यान्न
तंभवेत् स्तनवृद्धिप्रतीकारः दलापमानसंकुद्धहृदनिश्वाससंभवः प्राणिनोयातवैषम्याज्वरोज्वरयतेकिल २८

वातपित्तकफोद्भूतसन्निपातातिचारजः देवग्रहप्रकोपोत्थो मानसोष्टविधोज्वरः शोकक्रोधानयाजीर्णोत्सेतापाद्दलहानितः
श्चेतकालेवमन्नोनोजायतेदारुणोज्वरः शीतोदाहोभ्रमः कंपः प्रलयोवलतेजसोः वातिकज्वरविह्नानिपित्तजेपीतवर्णे
ता ३३ गात्रादिवेदनादाहः शिरःपीडातृषादिके प्रथमेजायतेदाहः पश्चाच्छीतांगवेदना निद्राश्लेष्मज्वरेविह्नंयासिधं
सन्निपातजो भ्रमात्ययःसततविंतेमानसोजायतेज्वरः पुत्रमित्रकलत्राणांयनसोष्टस्यनाशनः वियोगेनाथशोकेनसतते
चिंतितेनवा ३४ मंत्रौषधिक्रियायंत्रैरभिचारज्वरोभवेत् हन्तारामतडागेषुदेवतायतनेषुच गोब्राह्मणयतीनांचपीगे
कुर्वंतियेनराः तेषांदेवप्रकोपेनविज्ञेयादैविकाज्वराः ग्रहकोपाद्ग्रहोद्भूतोज्वरःसंजायतेद्रुतः नाशयेडग्रमेवैस्लेकिंवान
स्नानजनादिभिः श्रमेपिविविधाकाराव्यायामाजीर्णसंभवाः धातुवैषम्यसाध्यैः कायजातास्त्वनेकधा निर्कलसेवनात्
स्वेदाल्लेचनाडस्नदारिणा पानादामज्वरेदिनेपश्चात्काथःप्रयुज्यते ३९ ज्वरेष्टमध्याधमामात्रापलमर्द्धनदर्धतः लेहका
थौषधेमानहिंगुणंस्मथौषधे ४० शौषधेकठिनेमध्येकोमलेविहितंक्रमात् काथायनिर्मलतोयषोडशाष्टचतुर्गुणे ७१
मुस्ताधान्यकशुंठीनांगुडूच्यासहवातजे ज्वरंहंतिकषायोयंपित्तजेचनपर्पटे ४२ किंनाशुंठीविषंचैषांश्लेष्मजेचन
वासकैः धान्यकेनागरंतेषांमदेवीवाशुंठिपर्पटो रोहिणीधान्यकोशीरशुंठीमुस्ताकषायतः ज्वराःसर्वेविनश्यंति
वह्निदीप्तिजायते ४४ किंनोद्भवायनैविष्याभनिवक्वथितंजलं गुडूचीयाम्यकेनिवःपटोलंक्वथितंघना ४५ शाक्रा

ओं
७१

71

रामधुसंयुक्तः कषायो हन्ति पानतः वातपित्तकफोद्भूतं ज्वरं पथ्याशिनः परं पथ्यावह्निकणाधात्रीफलचूर्णं समांशतः म
क्षे हन्ति ज्वरं कासं त्वथा दीनमसंशयं ४७ शिवाधान्यकमुस्ताभिर्गुडूचीकुष्ठपर्पटैः काथो मधुयुतः पीतः समस्तज्वर
नाशनः भूनिंबो मलयजश्चैवावासकः किरमालकः धान्यकं क्वथितं तोयमेभिर्ज्वरविनाशनम् ते देवदारुनिशा
निंबो रोहिणी त्रिफलाघनः पटोलेश्वास्य क्वाथः सन्निपाते निदाहनं ५० गुडूचीशुंठी विश्वा कंटकारीयुतं जलं क
थितं त्रिगुणं काथं सन्निपाते निहंति वा कंटकारीकणाशुंठीगुडूचीक्वाथपानतः कासः श्वासो ज्वरः शूलं मंदाग्निः पीनसो व्र
जेत् किरीमालः शिवा शुंठी घनो रोहिणी पिप्पलीमूलमेभ्यः कषायेन वातः शूलं ज्वरो व्रजेत् पर्पटः केतकी मुस्ता रोहिणी कि
रिमालकः द्राक्षा क्वाथस्तृषामूर्छां न पतत्क्वाथो निहंति वा ५४ कणामधाज्यसंयुक्तात दाडिमस्य पानतः शाम्यति श्व
सहृद्रोगप्रलापविषमज्वराः गोमयोत्थरसो येन गोपयो वाथ विश्वया पक्वं पीतमजाक्षीरं विषमज्वरनाशने नागरं
देवदारुश्च धान्यकं हहती द्वयम् पतत्क्वाथस्य पानेन याति दाहज्वरः शमं गुडूचीत्रिफलामज्जा गंधो वालं च वा विणा पि
ष्टं गमस्तके लेपः कृतः पित्तज्वरापहः ५८ उडुंबरीशिफा छिन्ना तज्जले सितयान्विते पीते वातज्वरं हन्ति पटोल्यावा शिफा
जलम् ५९ जातीपर्पटनिर्यासः सितया हन्ति पानतः दाहज्वरं महाघोरं दंडः त्वथ्यातोयघेश्वरः ६० मधुपश्चिल्लयामुस्ता
हेयवेहहतीफले निद्रानिहंति नस्येन महतीमतिवेगतः मतिवेलालयाश्चस्य मधुना हन्ति नस्यतः काकजंघाजटानि

ॐ कुरुते मस्तके स्थिता तैले सर्जरसोपेतम् अम्लकांजिकपाचिते सजले लेपतो हन्ति ज्वरं दाहं च मारुतम् सृष्टाजालीकृताम्
ला: घृतालिलाजाश्वसैंधवम् यान्यजीरजलैः सिद्धा यवागूर्वीरिणं हिता ६४ पिप्पलीपिप्पलीमूलं चव्यचित्रकनागरैः यवा
गूः सर्पिषा सिद्धा दीपनी पावनी हिता ६५ नवेनोत्पाटिता देवी मूलिका कर्णवेधनात् ज्वरं वातकर्षिकं हन्ति भानुवारे न संश
यः निर्गुण्ड्याः सहदेव्याश्च कटौ बद्धा शिफाद्वयम् प्रातरादित्यवारेण सर्वज्वरविनाशकृत् विष्णुक्रान्तोद्धृता देवी मूलिका क
र्णवेधनात् इंद्राली मूलिका शीर्षे वातपैत्तज्वरनाशिनी कन्याकर्तितसूत्रेण बद्धापामार्गमूलिका एकाहिकं ज्वरं हन्ति
तिष्ठेद्वा याम तिवेगतः माहिकादिज्वरं हन्ति गंडादिगलके स्थिते धूमधानडगिपिकाम्लेषिष्ठा स्यात् संततज्वरं ७० अ
पामार्गजटा कट्यां लोहितैः सप्ततन्तुभिः बद्धा वारे रवेः शीघ्रं ज्वरं हन्ति तृतीयके ७१ वासापत्रस्थिरा दारु पथ्या नाग
रसाधिता सितामधुयुतः क्वाथ्यः स्याद्वातपैत्तिकज्वरापहः ७२ पुष्पेकस्य वटदर्पणं दग्धाप्रेतम्रवित्वरी ज्वरं करोति लेखि
तसैपेन प्रशमो भवेत् ७३ कर्णे बद्धा रवौ श्वेतलवेगरिपुमूलिका सर्वज्वरहरी श्वेतमंदारस्य च मूलिका ७४ कुष्ठुतोट
नेमंत्राः शंभुदेवेन कीर्तिताः २३ ॐ नरनारायणीये स्वाहा उत्पादनमंत्रः ॐ कुमारजननीये स्वाहा प्राशनमंत्रः उत्तराभिमु
खो भूत्वा ॐ औषधीमभिमंत्र्य खदिरस्कीलेन पश्चात्खनेत् प्राशनमंत्रः सर्वौषधीनां साधारणोयं विधिः धूपिले पोनिरोधेन
निंबकाष्ठेन कृन्तितः क्षते तेरमाते सा स्त्री गर्भं डः खविवर्जिता २४ पालाशबीजभूतिप्रपीता शीतेन वारिणा गर्भे नि

ङँ॰
७२

वारंमेवं पातयेत्स्त्रीरहिंग्रतः पालाशबीजमधाज्यलेपसामर्थ्ययोगतः योनिमध्ये स्थितो गर्भो न पतेत्स्त्रीकदाचन ३९ को
जिकेन जपापुष्पेण पिष्ट्वा पिबति योगिना अस्तौ पुष्पेन पतेत साधते वा स्यान गर्भिणी ४० तालिसं गैरिकं पीते विडालपदमात्रया
पीतं तडुलनावतर्थहि वै धानारी प्रजापते स्नाते तैलसंलिप्ते सिंधुत्वेडभगोदरे विशते सा बलाने वगर्भं पतेकदाचन ४१ यत
रमलिकापुष्पे गृहीता करिसंस्थिता गर्भं निवारयत्येव रेखावेश्यादियोषितां ४२ तंडुलीयकमूलानि पिष्ट्वा तंडुलवारिणा
अतं तस्य रहे पीतानि वंध्याकुर्वन्ति योषितां शाल्मलीकुसुमैः पिष्टैः तमदीरेणानेन च अतुकाले त्र्यहं पीते वंध्या नारी प्रजा
पते इति गर्भनिवारणी तिलाः सशर्कराः पद्मकंदेन मधुनान्विताः भक्षिता वारयत्येव पतते गर्भमंजसा ४३ लज्जालु
यातकीपुष्पमसलेमधुलोध्रके जलस्यायाः स्त्रियापीते गर्भपातं निवारयेत् ४४ समभागासितापुष्कं शालितंडुलचूर्णकं
उडुंबरीशिफाक्वाथं पीतं गर्भं सरक्षति ४५ पततं स्तंभयेद्गर्भं कुलालकरमृत्तिका मधुच्छागीपयः पीता किंवा श्वेताद्रि
कर्णिका गर्भिणी गर्भातीरक्तं स्तंभयेत्रपतद्रुते पारावतमलः पीतास्त्र्यहं तं तंडुलवारिणा ४७ कसेरुशृंगाटकजीवनीयप
द्मोत्पलैरेरंडशतावरीभिः सिद्धं पयः शर्करया च तक्रं प्रशस्यानि गर्भे विनिहंति शूले ४८ मधुयष्टिसितापद्मगोपपाने परिप्लुते
स्त्रीणां गर्भे हरत्याशु पीडां शेकोऽतिशीतलः गर्भपातनिवारणं तिथिवारोडुपसस्य समगर्भी संख्ययाकृते राशीभमहरेत्कन्या
समे स्याद्विषमे पुमान् ५० ओं ऐं ह्रीं सं वषट् कीलिते गर्भे मंत्राभिषेकः ओं ह्रं फं हसी स्वाहा ओं हं कुं स्मा स्वाहा कावदनेनाभिषे

कः ॐ ह्रूं ले स्वाहा अनेन पुष्यर्तवे नारीणामभिषेकः ॐ ह्रां रे ह्रौं स्वाहा अनेनापि कीलितेन गर्भेऽभिषेकः यो जीवति न स्वाध्याय
नेमन्तल्पस्तवति ध्रुवं ॐ हं फट् रे स्वाहा ॐ ङ्रा फट् रे स्वाहा ॐ ङ्रे फट् रे स्वाहा रैं शार्षपैरक्तनैवीपि भ्रांतो वा लेपरीक्षयेत् मौने
सेम्नीपेते वालो रोदने जीवति ध्रुवम् ५१ अभिषेकः हिंगुसैंधवसेयुक्तेन मकांजिकपानतः प्रसूरेस्त्रीफटौ वद्धे मूले वामा वालिं
गजे वा सर्वसमस्तरसपुकहस्तस्य मूलिका पुष्याहृता कटौ बद्धा सुप्रसूतिकरी स्त्रियः ५२ पाठापामार्गमूलाभ्यां योनिमध्ये वि

८	३	४
१	५	९
६	७	२

लेपनात् प्रसूतिर्नीयते शीघ्रं सुखं च प्रसवः स्त्रियः ५३ गुञ्जामूलस्य खण्डानि सप्त सप्त दलानि च खण्डितानि कटिस्था
नि सुप्रसूतिं प्रकुर्वते सुप्रसूतिकरी बद्धा कदलीमूलिका कटौ सुश्वेतकोकिलाक्षस्य मूले वा कर्णपूरिते ५५ विप्रके
केशाव स्त्रैणभूकदेवजमेभृता रक्तसूत्रेण संबद्धा सुप्रसूतिकरी कटौ ५६ पुटदग्धाहिनिर्मोकमसी मधुसमन्विता पूरिताक्षीन॰
याम्रुद्गर्भो गर्भे विमेचति वीजितानेन सूते स्त्री व्यंजनेन च कोष्ठके अष्टकत्रिपंचादि चक्रनैवढिकेन पूरिते ५८ पंचद

८	३	४
१	५	९
६	७	२

शिका यंत्रमिदं वज्रीनीरेण मसिभिः इमे विशल्या जायते तत्क्षणात् वाणशंखोपिफावाध विशल्यां कुरुते स्त्रियं श्वेतादि
कर्णिकां गुञ्जामूरसामूलिका धृता योनौ नारी सुखं गर्भं मोचयत्यतिवेगतः अन्येन स्याह्वीजानि हृतपिष्टानि लेपतः योनौ कु
र्वन्ति नारीणां सुप्रसूतिमतिद्रुतं जरायुते मृते गर्भे अपतेती जरामपि योषितोपातयन्त्येव पाठस्योत्तरणी शिफा ६२ जर्जरीकृत
तैलाढ्य वर्षाभूमूलिका अपि धृता योनिमुखे रामा विशल्यां कुरुते क्षणात् विशल्याप्रतीकारः सूतिकोपद्रवे जाते किराततिक्त

ॐ॰
७२
73

वेदने समपर्णीववामुस्तानितकान्वितपाचिते ६४ तैलेहंतिज्वरंलेपात्क्षतिकानामसंशयं शिरीषाश्वगंधयवैःशुक्लानेत्रापहे ६५
विशालाज्यपयोभक्तालेपोयोनिशूलहृत् हृद्बद्धुलेवीजपूरस्यरसः सैंधवसंयुतः ६६ शर्कराकृष्णामृद्वीकारोध्रशुण्ठीकणामधु
प्रियंगुः सारिवारक्तवेदनेसमभाजनः ६७ पद्भिः स्रार्धेपचेत्सर्पिः शीतलेमधुनिक्षिपेत् श्वासेकासेतथाशूलेहृद्रोगमूत्रकृच्छ्रके
कामलापाण्डुरोगेचविषमे[illegible]भोजनात् वालेभ्योपिप्रदातव्यंप्रज्ञावलविवर्द्धने गर्भवत्याःस्थिरेगर्भेहृद्बद्धुलेमवलेज्वरे छ
र्दौमोहेतथाश्वासेगल[illegible]दोषयम् विशल्याज्यपयोभक्तालेपतोयोनिशूलहृत् हृद्बद्धुलेवीजपूरस्यरसः सैंधवसंयुत
शर्कराकृष्णामृद्वीकारोध्रशुण्ठीकणामधु हहतीनिवलाकंटकारीकटुकरोहिणी वलाशुक्तेश्रुतंतैलमभ्यंगःकर्णशूलते कपित्थ
त्वदिरैरेण्डवटाश्वत्थपल्लवैः शृक्तनापितपानीयस्नानेगर्भवतोहिते पयसाज्येनभोक्तव्यमन्नेमधुरसेनवा गर्भिण्यारोगनाशा॰
शायदयादक्षिण्यशीलयामधुमालोगलोमलनाभिलेपोतिशस्यते प्रसूतौयोषितांपानेवालेभेषजमव्यते ७४ ब्राह्मीमध
वेलामर्पिः सैंधवसोपजीवनात् मेधावीवलवान्वालोनिर्व्याधिःस्यान्नदोजितः ७५ ॐनमःस्वामंत्रेनमोदिव्येहं २ ह्रीं २ ह्रीं २
स्रपसरेत २ डहद्रहाहे २ तत्रगक्षेत्रग्रहकाः स्मसमवस्थानेतान् रक्षोन्नापपतिस्वाहा अक्षतैः शर्षपैर्दत्तातत्रस्तंभः प्रवेधनैः
पषाविधासदासिद्धाश्रेस्त्रीवालाभिरक्षणे ७६ सुरसापत्रनिर्यासोहालाजीर्णेगुडोदन तक्रपीतेवरोगस्यशूलेनिर्मूलतो
नयेत् योनिशूलेसमेगक्रतयपामार्गसमदवान् साइमलान्तरलेपेनयोनिमध्येनसंशयः ७८ एरंडतैलसंयुक्तंमेडीमूलमले

पतः नवप्रसूतनारीणां योनिशूलं प्रशाम्यति पक्वयवयवक्षारो योनिशूलं निवर्तयेत् सर्पिषा वोष्णतोयेन पीतः शीतं यथा
नलः योनिशूलहरं पीतं सर्पिः कप्पीसवीजयुक् आखुमांसेन पक्वं वा तैलं सं योनिविलेपनात् सुधाकांडं सलवणं दग्धा भस्म
समन्विते वातगुल्ममदावर्तं योनिशूलं च नाशयेत् योनिशूलप्रतीकारः शालितंडुलपिष्टेन यत्पीतेन योषितो भ्रविडंगधेभ
वेत्समर्दिते नीराक्षभोजने शिफाकुक्कुरवेदस्य दंमस्तु स्नातृताम्भवे स्तनवृद्धिकरी स्त्रीणां स्तनकीलकनाशिनी स्तनपी
डः शमं याति विशालामूललेपतः कुमारीकंदलेपो वा महद्रिद्राति वेगतः माहिषमस्तुनां कुष्ठमश्वगंधेभपिप्पली वचा ।
यौवनलेपनं भूरि दीर्घं भवेत्स्त्रियः भूमिकूष्मांडमूलानां द्रप्यपीतेः स्तनौ स्त्रियः पयोधरः पयोभूरिमेतुवत्सकैर्यथावनाः स्तन
वृद्धिप्रकरणं स्तनमर्दो स्त्रियः कुर्यान्नीनावाहेतिकाशिफा निशांते मधुसर्पिर्भ्यां लीढं वाथ करोत्यहं प्रवेशे निर्गता यो
निः कारवल्लीकंदलेपतः शिथिलापि भवेज्जाढ्या शक्रगोपाम्ललेपतः केतकीपत्रसंभूतेरसस्तैलेन पाचिते सेनालिमावला
योनिगाढ्यमासादतिविस्तृता एः भूकंदमूलसंयुक्तं मधुकपंचसविता गतेपि यौवने स्त्रीणां योनिगाढ्यातिजायते स्तदोडंब
रयो चूर्णं फलिनी तैलपाचिते मधुमिश्रेन याल्लेपा योनिगाढ्यातिजायते हेनाकस्य रसैस्तैलं वाससं दैर्लीपिता स्त्रिभिः यो
निर्गाढ्या भवेत्स्त्रीणां प्रसूता यापि विस्तृता चूर्णेनालेपलाशस्य भस्मनि लोमकदंबके शरखंडं डभागेन मेलिते हंति लेपत
लोमसंवेसमस्तापनत्यदेशे विलेपिते कौसुंभजातैतेलेन तकसादिवनेडरूवः दोडमर्कपटे म्यह्मर्कं लीरसमन्विते लोम

ॐ
७४
74

न्नहन्तसर्पिर्धिघृतमेतेलेपात्मणाशयेत् इति श्रीवेद्यके द्विजदत्तिणापिष्टानां पयोद्धृतसमन्वितः दिनादौ जातबालेभ्यो दत्तो
रक्ताकरोमतः वालेनवालयेद्वालमश्वीरेणाथमेचिते अष्टोत्तरसहस्रेण सर्वरक्षाकरं करे भूतव्याधिविवादीनां रक्षामे
गसगौरवे कुष्ठमंत्रपानेनवालानां कुहतेसदा मयूरचूलिकामूलमादित्यग्रहणेधृतं वालकस्य गलेवद्धे समस्त
ग्रहदोषहृत् भुगाहिकृतनिर्गुडीवचाकुष्ठसमाल्यकं कनकाम्बमयेयोवालकग्रहनाशनः शंखोत्पलवचाकुष्ठहकलश
लोहविधारणे सर्वोपद्रवतो वालं कालादपि स्वरक्षति अर्कडरसेनिशागुडीगोधृतेनविलेपनं सर्वोपद्रवदोषेभ्यो वालं रक्षति
संततं श्वेतनिर्गुण्डिकामूर्वमूलं गलविलंबितं दंतोद्गमव्यथां हंति पापं ध्यानोयथेश्वरः एकावाकुगिनीश्वेतंवीनाशोवछ
षीजटाधृता कंठे दंतोद्भवोत्थवेदनाहरणेक्षमः धातकीजलल्लोध्रेत पिप्पलीश्रीफलंमधु चूर्णेहंतिकषायोवावा
लातीसारमल्वणं षण्मासीवीरसस्नानोवालानांमस्तकेवले पलाशमूलिकालेपेनश्वेतकुमयःकृतं स्ववर्णगै
रिकं दोलां विडंगदेवदारुच शिलातलानिशागुकेंष्ठेजने सर्वरोगहृत् ववावालाशिफाचूर्णं घृतंतैलं खरानपे विधृतेस
खदं लेपाद्वालानां सततं निशि अनेनैवकृतंभ्यंगीयवचूर्णैर्वलान्वितैः उद्धर्तितः शुभः स्नानोवालोतिलभतेवलं कुष्ठाम
यावचाब्राह्मीकनकेमधुसर्पिषा वर्णायुःकांतिजननंलेपंवालस्यदापयेत् समब्रह्मदानमज्ञार्ककरंजकरवीरकैः चूर्णैरु
द्वर्तितःस्नानोवालोतिलभतेवलं लाजनाशिलामांसीमधुकैःसूक्ष्मचूर्णितैः लेहःदोद्भवतोदेयोवालस्यज्वरनाशनः

वातकीकुष्ठधान्याकलोध्रैंद्रयववालकैः लेहः क्षौद्रेण वालानां ज्वरसतीसारवांतिहृत् शालिपर्णीजनैर्मूर्वाशिग्रुमुस्तोग्रदपाक
न्त्रत् गोजिह्वाजनकालेपो देयो वासितवंदने कर्षेण मक्षिताक्षौद्रा मस्तैलालाक्षैधवैकृतः मूत्रग्रहेदानवाशिग्रुमुस्तोलेह मस्ममस्
हरीतकीवचाकुष्ठवल्कैर्माक्षिकसंयुते स्तन्येन वालकः पीत्वा मुच्यते तालकंटुकात् वचाकुष्ठविडंगानां कोसकाष्ठवलेहना
त् दद्रुविंनर्विकाकेटुकृमिभिर्मुच्यते शिशुः महाकूष्मांडवीजानि देवदारुकलिंगकैः पिष्ट्वा तोयेन लेपो यं शोफघ्नः परमः
शिशोः वालवैद्यं प्रवक्ष्यामि समासाद्भावलक्षणैः दिने प्रजाद्ध्यैदिशो भागेमंत्रेतद्रुमलक्षणं प्रथमे दिवसे मासे वर्षे गृह्णाति वा
लकं योगिनी मालदानाम सर्वसत्वभयावहा छर्दिर्मुर्च्छा ज्वरः कंपः शोषो दीनस्वरोभ्रशाम प्रतिक्रा स्तनपाने च तयाग्रस्त
स्य लक्षणं द्वितीये दिवसे मासे वर्षे गृह्णाति वालकं सनंदा योगिनी नाम प्रथमे जायते ज्वरः सेको वोहस्तपादानां श्वेदि
रोगोनिरुद्धर्दने ग्रभयत्नं कशाये च तद्रूपस्येति लक्षणं तृतीये दिवसे मासे वर्षे गृह्णाति वालकं पूतना योगिनी नाम गात्र
भंगो ज्वरो हविः प्रलापः कंधरा शोषः छर्दिरित्यादिलक्षणं अपराह्णे च वाहुणेणां पंचशाखि वलिं दिये पत् चतुर्थे दिवसे मासे व
र्षे गृह्णाति वालकं भीषणा साम महारौद्री योगिनी मुखमंडने तया गृहीतमात्रस्य प्रथमे जायते ज्वरः श्वासः कासो हविा
गात्रभंगोऽदर्वलनैगिते दक्षिणां दिश याम्यिना पंचरात्रे वलिं दिये पत् पंचमे दिवसे मासे वर्षे गृह्णाति वालकं विडाली
नाम तद्रूपे च लक्षः मूलेज्वरो हविः गात्रमोऽडनमित्यादि दक्षिणे तद्वलिं दिये पत षष्ठे च दिवसे मासे वर्षे गृह्णाति वालके

ऊं·
७५
75

शकुनीनामतनुस्तः श्वासः कासोरुचिर्ज्वरः हस्तपादादिसंकोचः वक्त्रः पीडेतिलक्षणे पंचरात्रेबलिंतस्यैवारुणपोदिशिनिक्षिपे
त् सप्तमेदिवसेमासेवर्षे शुष्काभिधाशिशुं गृह्णातिरोदनेशोषोज्वरः कंपादिलक्षणे पश्चिमेपंचरात्रेचबलौदद्याच्छिशुः सुखी
अष्टमेदिवसेमासेवर्षेगृह्णातियंभया तयागृहीतमात्रस्यप्रथमेजायतेज्वरः शिरःपीडाक्षिरोगश्चनन्दषेत्यादिलक्षणे दक्षि
णांदिशमाश्रित्यबलिंदेवैप्रदापयेत् नवमेदिवसेमासेवर्षेगृह्णातिबालकं अर्जिकायोगिनीनामगात्रभंगोज्वरोतिरुक्
छर्दिः प्रलापइत्यादितद्गृहीतस्यलक्षणे उत्तरांदिशमाश्रित्यबलिंतस्यैप्रदापयेत् दशमेदिवसेमासेवर्षेगृह्णातिबालकम्
रोदनेकंपनेछर्दिर्ज्वरोद्वेलनादिरुक् पूर्वांदिशंसमाश्रित्यबलिंतस्यैप्रदापयेत् एकादशेदिनेमासेवर्षेगृह्णातिलिम्पि
का गात्रकंपोज्वरस्तीव्रस्तद्गृहीतस्यलक्षणे भानुसंख्यदिनेमासेवर्षेगृह्णातिबालकं पोतलीयोगिनीनामरोदनेवेदना·
ज्वरः निद्राक्षीणः स्वराः पीतवपुराहारशून्यता उत्तरादिशमाश्रित्यसप्तरात्रिंबलिंक्षिपेत् कामसंख्येदिनेमासेवर्षेगृह्णा
तिबालकं भद्रकालीज्वरोतिनिद्राश्वासहस्तस्यकंपने वेदनाहृदिनिश्वासोकायः पीतोविवेष्टितं पूर्वांदिशंसमाश्रित्यबलिं·
देवैप्रदापयेत् चतुर्दशदिनेमासेवर्षेगृह्णातिबालकं ताराख्यायोगिनीनामज्वरःशोषोरुचिर्भृशं वक्त्रःपीडेंगितंतस्याःप
श्चिमेबलिमाहरेत् त्रिःपंचदिवसेमासेवर्षेगृह्णातिबालकं कुमारीजनयेद्रोगंज्वरःशोषादिवेष्टितं नैरृत्यांदिशमा·
श्रित्यसप्तरात्रंबलिंक्षिपेत् बालेसंस्थापयेत्पश्चाच्छान्तितोयेनमंत्रवित् नदीतीरद्वयात्कुम्भमृदादेवीस्वरूपकंकृत्वापूजाप्रकर्त

याधुष्पस्र्यादिभिस्ततः वटुकाः तटुकाः सपायसभक्तं गुडोदधि वर्तवर्णपताकाश्च प्रदीपाः पुष्पवेदने पूजेयं सर्वदेवीनामपराह्णे
तथा बलिं सर्वत्र नामभेदेन बलिदाने विधीयते ॐ नमो भगवते श्रमकदेवि बालेमेच २ बलिं गृह्णाण स्वाहा सर्वत्र बलिनि
वेदनमंत्रः इति बालतंत्रे समाप्तं वर्त्तिनालद्रमणामूलेषेरिते मुखवायुना योनिमध्येगते गर्भे ग्राहयेन्महिषीगवान् शाल्म
लीतलसंजातैः दर्भैर्विडस्य वेधनात् शृंगोताप्याप्यजनपाशुजरामदेगकारिणी गुंजावादालिविडंवानालवल्लीदलं तथा
गोमहिष्यादिजीवेभ्यो दत्ते पातयते ज्वरान् मधुजीरकगोरेभातकेलेपप्रभावतः वसंतेतिह्यतिगोत्तीरं प्रभुरेव प्रयच्छति
विलिप्तमनेनाविद्धे पाषाणे पुरतः स्थिते वदंती मूत्रवत्सापिबद्धोतिस्फुरभीदुतं उन्मविलेपिते शृंगे क्रमिर्तिः पतति व्रणा
त् देतोदधोमविलिप्तेवदृष्टदंडागवां धुवं मंडलीहिमत्ताहिः शृंगावेः शाकहस्तस्य हरिणेतेः सहृतेस्यहे दंतेनश्चयतस्ती
सारस्यहे पानीयवारणात् सवकेयावनालान्नप्रदेये दिवसत्रयं जलेवदीयते शीर्षतापिते मात्रयान्विते वहणस्य दलेह
स्तपीडिते गलते रसः सव्रणे प्रविते शोषे कृमिजाले निपातयेत् पारंगदलनिर्यासप्रवितान्व्रणकोटरात् कृमिजालेपत
त्याशु प्राणिनां हि वत्सपदां मनुष्यगोमहिष्यादेरुत्सांभद्रालितो व्रणेः कटुतैलेन संलिप्तः महद्वंजातिनिः कृमिः ग्रबल
हृदयपत्राणं लेपो गोमुखरोगहृत् गोनामसंभवः तारोहृतिपुष्पं विरोऽद्रवे गोमहिष्यादिजीवानां हेतिपुष्पमतिद्रुतं वो
डालस्य विनाभूतिगोलितावारिणामृता राजमूत्रस्य पानेन केशेनापि समं व्रजेत् गोमहिष्यादिजीवानां मरकोव्याधिसंचय :

डों॰ ७८

76

ग्रस्पिवा निहितं योहे मरकव्याधिनाशकृ इति गोमहिषीवाहगजानामपि वेगतः लाजाकृष्टं पुरे मांसी गोमयं तत्र रोहते म
यूरो गोमहिष्यादेश्च यो योहे ज्वरापहः दिने शेषे समस्तत्रैय सनो त्रिकटाकृतिः ललाटे लोखने कुर्यात्स्वल्पे लोहशला
कया अस्मदंशोषिफा किं वा वर्हीवको कमलिका मध्यस्ते भेरदारङ्गलो नवनीते करोति सा पश्येत्पशो पि गजायावीजेनाजि
तलोचनः वाजीमर्दनेणसे पूर्णं च दत्त्वीस्विदतो भस्ना चूर्णीकृते शुष्ठे स्वायालवणान्वित पिंडितः वारिस्फोटादाविनश्यंति द्रुतं वे
सरवाजिनो धान्निः कुमारिकापत्रपिंडो लवणसंयुतः इति कं दूदशाहेन राजवेसरवाजिनो करे कुंभे कटे कर्णे प्रवेहे कुदि
पेवके गात्रे खुरद्वये प्रक्षेरत्नोकुर्वीत भस्मना ॐ गजे पाहि लीलाहि लिलाहि वाहि धारिणी शशिखंडिनी एकपादे द्वि
पादे त्रिपादे वतः पादे वस्ते भेरहम स्वे भे स्वाहा गजरक्षामंत्रः स्थाने स्तंभेन घाहारे भांडोपकरणादिके शाप्यापां व बलिं द
द्यात् द्विरदस्य महात्मनः ॐ विघ्नेभ्यः सर्वगणेभ्यः स्वाहा बलिदानमंत्रः कुष्टे सैधवसंयुक्तं मधुलिप्तं गवालके देष्ये
पिकुरुते प्रीतिं पाजिनी प्रस्तवान्विता प्रस्वेदो रोमहर्षश्च गात्रग्लानिस्तथा हविः ग्रल्पविड्मूत्रवैवर्ण्यं सर्पदष्टहयेंगि
गिते स्यापरे पि विषे विड्मेतदेव न संशयः कीटादिकविषे लालास्रावो वाहस्य जायते प्रोफे दंशप्रवेश स्यादन्यत्सर्पेण
दष्टवत् तत्रादौ घृतपानेन जीवरक्षा विधीयते ततः कुर्यात्क्रियां वैद्यो गमामृद्दर्तनादिकां नंडुलीयस्य मूलानि तथा बिल्व
कपित्थयोः गोमूत्रेण समालोड्य सर्पदष्टं तु पायसेत् सर्पदंष्ट्रास्य वाहस्यादितः प्रदेशा स्ताणबुद्धिमान् छेदये देशदेशवाशिरां

वीतत्रवेष्टयेत् एवंकृत्वाभिषकस्तर्णैः श्रीव्रश्रुद्धर्नैयेन्मतः कृष्णविलकर्णैवीभिः पिप्पलीघनसैंधवैः पपामामविवश्रुंठीभिर्यथा॰
लाभेसमाहृतैः एवंकृतेफवेवाहानिर्विषास्तर्नवान्यथा वेदनागहकुष्ठेश्वलोध्रभार्गीफाणिजकैः दंशलेपेविषंहन्तिस्या
वरेजंगमेष्वनः पानतःकष्यतेस्वादेरपस्मारस्यलक्षणं धत्तपादोयपोःकस्मात्केनेमेवभ्रुवोद्भवि एतन्नातिहतिदिपम
पस्मारीतिकीर्तितः पुराणसर्पिषःपानेनसेवातस्यघ्नस्यते तृणांतःस्थितमर्कध्याभक्षणेपितदेवहि लोभकेनिंवपत्रा
णिगुग्गुलंशार्षपेघृते वस्त्रेवधावचोहिंगुंवभीयाहाजिनोगले अश्वरत्ता समीपेयानरःस्याप्योवाजिनोदृष्टिगोचरे
गोःस्ववत्साहृषःस्वेतःश्वानकोवायकुक्कुटः वतरत्नेकलाकोष्ठेमात्रकादतरसेवयः एकैकक्रमतःज्ञातमकाद्यदिलिखे
द्बुधः द्वित्रियेवाह्यपेवाह्यद्वित्रिवेदैकसप्तषट् सप्तषट्वतरेकोकालेख्याकोष्ठेष्वनुक्रमात्
मश्वमात्रादरैःसंख्याह्वाभ्याहृत्वेकसप्ततः जीवितेमरणेरोगेगजाश्वमाहिषीगवां जयेपराज
येशुद्धेलाभालाभौवदस्तनः श्वास्तिनास्तीतिजानीयाद्वक्रादकडुमाभिधात् नवोर्द्धेस्थापयेद्देख्यालि
येकुंएकैकीतथात्रिधा अष्टौवाणरसावेदारसाश्चेद्वेद्यथयोयमौ वर्णाष्टकमधोलेख्यनाममात्राविव
चारयेत् एकीकृत्यततस्तद्वैस्तानिभिभोगमाहरेत् अधिकेतजयेविंद्याद्धीनमात्रेमृतिर्भवेत् समे
वीसंधिरादेश्यानाममात्रेणवान्यथा योद्धानोनामनोज्ञानास्वरान्वर्णान्यपकसपक

अइऔ	गऊश्च	इएऋ	ईऐअः
कउक	खवेज	गळ्ट	ठजेड
डघप	ढडफ	णथव	तनर
यमह	षशल	नषत	लसप

८	५	९	४	१	२	३	२	अंकाः
अ	क	च	ट	त	प	य	श	वर्णाः

ॐ ८८ 77

वर्णाश्च द्विगुणाः कार्याः स्वराश्चैव च तद्गुणाः अनिमित्तहरे ज्ञाने विषमे तु जयो भवेत् मात्राभावे भवेन्मृत्युः समे संधिं समाः
